# शिल्पकारः करमरकरमहोदयः।

**अवबोधनम्।**

**अ. एकवाक्येन उत्तरत।**

*१. सासवणेग्रामः **कुत्र** वर्तते?

**उत्तरः** सासवणेग्रामः **कोङ्कणप्रदेशे रायगडजनपदे** वर्तते।

*२. बाल्ये विनायकः **किं** करोति स्म?

**उत्तरः** बाल्ये विनायकः **पित्रा सह मृत्प्रतिमानिर्माणं** करोति स्म।

**किंवा**

बाल्ये विनायकः **पित्रा सह मृत्प्रतिमाः निर्मातुं प्रारभत।**

३. सासवणग्रामे **किं** वर्तते?

**उत्तरः** सासवणग्रामे **नयनरम्यः चित्ताकर्षकः करमरकर-शिल्पालयः** वर्तते।

४. करमरकर-शिल्पालयः **केषां** कृते पण्ढरपुरमिव तीर्थक्षेत्रम्?

**उत्तरः** करमरकर-शिल्पालयः **कलावतां तथैव कलारसिकानां कृते** पण्ढरपुरमिव तीर्थक्षेत्रम्।

५. पाण्डुरङ्गकरमरकरस्य गृहं **कीदृशम्** आसीत्?

**उत्तरः** पाण्डुरङ्गकरमरकरस्य गृहं **सङ्गीत-चित्र-कलादिभिः परिपूर्णं, शान्तिसुखयोः निधानमिव** आसीत्।

६. करमरकरस्य गृहे **कदा** पुत्रजन्मोत्सव: संपन्न: जात:?

**उत्तर:** करमरकरस्य गृहे **एकनवाष्टैकतमे ख्रिस्ताब्दे (१८९१) ऑक्टोबरमासस्य द्वितीये दिने** पुत्रजन्मोत्सव: संपन्न: जात:।

७. **केषां** प्रतिमानिर्माणे विनायकस्य रुचि: आसीत्?

**उत्तर:** **विविधप्रणिनां देवतानां च** प्रतिमानिर्माणे विनायकस्य रुचि: आसीत् ।

८. विनायक: **कस्मिन्** मग्न: आसीत्?

**उत्तर:** विनायक: **पुस्तकस्थानां विविधचित्राणां पुनर्विलेखने** मग्न: आसीत् ।

९. **केन** विनायके समुचितसंस्कारा: समारोपिता:?

**उत्तर:** **सततं निरीक्षमाणेन विनायकस्य पित्रा** तस्मिन् समुचितसंस्कारा: समारोपिता:।

१०. सासवणेग्राम: **कं** निकषा एवाध्युषित:?

**उत्तर:** सासवणेग्राम: **समुद्रम्** निकषा एवाध्युषित:।

११. ग्रामभूषणं **किम्**?

**उत्तर:** ग्रामभूषणं **करमरकर-शिल्पालय:**।

१२. प्रतिमानिर्माणे **कस्य** रुचि: आसीत्?

**उत्तर:** प्रतिमानिर्माणे **विनायकस्य** रुचि: आसीत्।

१३. विनायकस्य पित्रा तस्मिन् **के** समारोपिता:?

**उत्तर:** विनायकस्य पित्रा तस्मिन् **समुचितसंस्कारा:** समारोपिता:।

१४. पाण्डुरङ्गकरमरकर: **क:** असीत्?

**उत्तर:** पाण्डुरङ्गकरमरकर: **कृषीवल:** असीत्।

**ब. मञ्जूषातः उचितं पर्यायं चित्वा रिक्तस्थानं पूरयत।**

*१. ________ निकषा एवाध्युषितं रम्यस्थलम्।

(समुद्रस्य / समुद्रम् / समुद्रात्)

**उत्तर:** **समुद्रं** निकषा एवाध्युषितं रम्यस्थलम्।

*२. बाल्य एव स ________ सह मृत्प्रतिमाः निर्मातुं प्रारभत।

(पित्रा / पित्रे / पिता)

**उत्तर:** बाल्य एव स **पित्रा** सह मृत्प्रतिमाः निर्मातुं प्रारभत।

*३. ________ कृते पण्ढरपुरमिव तीर्थक्षेत्रम्।

(कलावद्भिः / कलावतां / कलावन्तः)

**उत्तर:** **कलावतां** कृते पण्ढरपुरमिव तीर्थक्षेत्रम्।

*४. ________ तस्यासीद् रुचिः।

(प्रतिमानिर्माणस्य / प्रतिमानिर्माणाय / प्रतिमानिर्माणे)

**उत्तर:** **प्रतिमानिर्माणे** तस्यासीद् रुचिः।

*५. विविधचित्राणां ________ स मग्न आसीत्।

(पुनर्विलेखने/ पुनर्विलेखनम् / पुनर्विलेखनाय)

**उत्तर:** विविधचित्राणां **पुनर्विलेखने** स मग्न आसीत्।

**क. अधोनिर्दिष्टं वाक्यं सत्यं वा असत्यम् इति लिखत।**

१. सासवणेग्राम: वनं निकषा एवाध्युषितम् आसीत्।

उत्तर: **असत्यम्।**

२. करमरकर-शिल्पालय: कलावतां तथा कलारसिकानां कृते त्र्यम्बकेश्वरमिव तीर्थक्षेत्रम्।

उत्तर: **असत्यम्।**

३. विनायक: बाल्य एव पित्रा सह मृत्प्रतिमा: निर्मातुं प्रारभत।

उत्तर: **सत्यम्।**

४. पुस्तकस्थानां विविधचित्राणां पुनर्विलेखनेऽपि स मग्न: नासीत्।

उत्तर: **असत्यम्।**

५. तस्य पित्रा तस्मिन् समुचितसंस्कारा: समारोपिता:।

उत्तर: **सत्यम्।**

**ङ. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।**

१. ________ अत: स: बाल्ये एव मृत्प्रतिमा: निर्मातुं प्रारभत।

(प्रतिमानिर्माणे विनायकस्य रुचि: आसीत् / विनायकस्य गृहे विपुला मृत्तिका आसीत्)

उत्तर: **प्रतिमानिर्माणे विनायकस्य रुचि: आसीत्** अत: स: बाल्ये एव मृत्प्रतिमा: निर्मातुं प्रारभत।

## माध्यमभाषया उत्तरं लिखत।

१. विनायकस्य जीवने कलाबीजं बाल्ये एव आरोपितं वा न वा एतस्य विषये भवतां मतं माध्यमभाषया लिखत।

उत्तर: 'शिल्पकार: करमरकरमहोदय:।' या पाठात आंतरराष्ट्रीय पातळीवर स्वत:ची ओळख निर्माण केलेल्या श्री. विनायक करमरकरांचा जीवनपट आपल्यासमोर उलगडला जातो.

विनायक यांचा जन्म 'पांडुरंग करमरकर नावाच्या एका शेतकऱ्याच्या घरी झाला. त्यांचे घर समुद्राजवळ वसलेल्या 'सासवणे' नावाच्या गावात होते. निसर्गरम्यतेची भरभरून देणगी मिळालेले ते गाव खरोखरच सच्च्या कलाकाराला कलासधनेसाठी उद्युक्त न करेल तर नवलच ! आणि म्हणूनच विनायकांचे घर नेहमीच संगीत-चित्र-कला इत्यादींनी भरलेले असे. आजूबाजूचे वातावरण, घरातील परंपरा यांचा विनायकांच्या छंदांमध्ये मोठाच वाटा आहे असे म्हणावे लागेल.

अगदी लहानपणीच विनायकांनी वडिलांबरोबर मातीपासून मूर्ती बनविण्यास सुरुवात् केली. वेगवेळ्या प्राण्यांच्या व देवतांच्या मूर्ती बनविण्याची त्यांस विशेष आवड होती. पुस्तकातील वेगवेगळ्या चित्रांचे रेखाटन

करण्यात ते मग्न असत. ही कलासाधना चालू असताना त्यांचे वडील नेहमी त्यांचे निरीक्षण करीत. छंद जोपासण्यासाठी वडिलांनी त्यांना नेहमीच प्रोत्साहन दिले. तसेच त्यांवर योग्य संस्कारही केले.

अशाप्रकारे लहानपणीच वडिलांच्या आधाराने विनायकांची कलेतील आवड जोपासली गेली आणि वृद्धिंगत झाली.

## क्रमसंयोजनम्।

१. क्रमानुसारं अधोनिर्दिष्टानि वाक्यानि संयोजयत।

i. विनायक: बाल्ये एव पित्रा सह मृत्प्रतिमा: निर्मातुं प्रारभत।

ii. तस्य गृहे पुत्रजन्मोत्सव: संपन्न: जात:।

iii. पित्रा तस्मिन् समुचितसंस्कारा: समारोपिता:।

iv. सासवणेग्रामे पाण्डुरङ्गकरमरकरनाम्न: कृषीवलस्य गृहमासीत्।

उत्तर: i. **सासवणेग्रामे पाण्डुरङ्गकरमरकरनाम्न: कृषीवलस्य गृहमासीत्।**

ii. **तस्य गृहे पुत्रजन्मोत्सव: संपन्न: जात:।**

iii. **विनायक: बाल्ये एव पित्रा सह मृत्प्रतिमा: निर्मातुं प्रारभत।**

iv. **पित्रा तस्मिन् समुचितसंस्कारा: समारोपिता:।**

## शब्दज्ञानम्।

**अ. गद्यांशे पर्यायवाचिशब्दं चिनुत।**

| | | | |
|---|---|---|---|
| *१. | सागरः, रत्नाकरः, सिन्धुः, जलधिः, उदधिः | = | **समुद्रः।** |
| *२. | पुरम्, नगरः, खेटकः (गाव) | = | **ग्रामः।** |
| *३. | वासरः, अहः (दिवस) | = | **दिनम्।** |
| *४. | मूर्तिः, प्रतिकृतिः, पुत्तलः, पुत्तलिका | = | **प्रतिमा।** |
| *५. | कृषकः, कृषिकः, कर्षकः, क्षेत्राजीवः (शेतकरी) | = | **कृषीवलः।** |
| ६. | मनोहरः, रमणीयः, चित्तहारी (सुंदर) | = | **नयनरम्यः, चित्ताकर्षकः।** |
| ७. | आभरणम्, आभूषणम्, अलङ्कारः, मण्डनम् (दागिना) | = | **भूषणम्।** |
| ८. | पुण्यक्षेत्रम्, महालयम् | = | **तीर्थक्षेत्रम्।** |
| ९. | गेहम्, सदनम्, निकेतनम्, वेश्म, सद्म (घर) | = | **गृहम्।** |
| १०. | आत्मजः, तनयः, सुतः, सूनुः (मुलगा) | = | **पुत्रः।** |
| ११. | शिशुः, अपत्यम् | = | **बालः।** |
| १२. | जनकः, तातः, जन्मदाता (वडील) | = | **पिता।** |
| १३. | देवः, अमरः, निर्जरः, विबुधः, सुरः | = | **देवता।** |
| १४. | समीपम्, समीपे, निकटे (जवळ) | = | **निकषा।** |

**ब. गद्यांशे विलोमपदं चिनुत।**

१. दूरे × **निकषा।** (जवळ)

२. अरसिकाः × **रसिकाः।**

३. अपूर्णम् × **परिपूर्णम्।**

४. असंपन्नः × **सम्पन्नः।**

५. अशान्तिः × **शान्तिः।**

६. दुःखम् × **सुखम्।**

७. वार्धक्यम् × **बाल्यम्।**

**क. समूहेतरपदं चित्वा लिखत।**

१. निकषा, कृते, ननु, सह

**उत्तरः ननु।**

२. अध्युषितम्, जातः निर्मातुम्, मग्नः

**उत्तरः निर्मातुम्।**

३. सततम्, परिपूर्णम्, केवलम्, परम्

**उत्तरः परिपूर्णम्।**

४. पित्रा, तत्र, इव, एव

**उत्तरः पित्रा।**

५. मग्नः, सम्पन्नः, प्रारभत, समारोपिताः

**उत्तरः प्रारभत।**

**ड. योग्यं चतुर्थपदं लिखत।**

१. पण्ढरपुरमिव : पण्ढरपुरम् + इव :: निधानमिव : ________

उत्तर: पण्ढरपुरमिव : पण्ढरपुरम् + इव :: निधानमिव : **निधानम् + इव।**

२. एवाध्युषितम् : एव + अध्युषितम् :: तस्यासीत् : ________

उत्तर: एवाध्युषितम् : एव + अध्युषितम् :: तस्यासीत : **तस्य + आसीत्।**

**इ. धातुसाधित-अव्ययानां चयनम्।**

१. गद्यांशे आगतं हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययं चित्वा लिखत।

उत्तर: निर्मातुम्।

**फ. सन्धिविग्रहं कुरुत।**

| | | | |
|---|---|---|---|
| *१. | एवाध्युषितम् | = | **एव + अध्युषितम्।** |
| *२. | बाल्य एव | = | **बाल्ये + एव।** |
| ३. | नैतत् | = | **न + एतत्।** |
| ४. | ग्रामेऽस्मिन् | = | **ग्रामे + अस्मिन्।** |
| ५. | पित्राऽपि | = | **पित्रा + अपि।** |
| ६. | स मग्न आसीत् | = | **सः+ मग्नः +आसीत्।** |

**ग. सन्धिं कुरुत।**

| | | | |
|---|---|---|---|
| १. | तथा + एव। | = | **तथैव।** |
| २. | गृहम् + आसीत् | = | **गृहमासीत्।** |
| ३. | तस्य + आसीत् | = | **तस्यासीत्।** |
| ४. | पुनर्विलेखने + अपि | = | **पुनर्विलेखनेऽपि।** |
| ५. | पुत्रजन्म + उत्सवः | = | **पुत्रजन्मोत्सवः।** |

## अवबोधनम्।

अ. **एकवाक्येन उत्तरत।**

*१. ग्रामव्यवस्थापननिरीक्षणार्थं **कः** आगतः? तेन **किं** कृतम्?

उत्तरः ग्रामव्यवस्थापननिरीक्षणार्थं **अलिबागमण्डलाधिकारी ऑटोरॉथफिल्डमहोदयः** आगतः। तेन **विनायकः मुम्बईस्थिते जे. जे. महाविद्यालयं प्रवेशितः।**

*२. **कः** विनायकं कोलकत्तानगरं निमन्त्रितवान्?

उत्तरः **गुरुवर्यरवीन्द्रनाथटागोरमहोदयः** विनायकं कोलकत्तानगरं निमन्त्रितवान्।

*३. प्रगतशिक्षणार्थं विनायकः **कुत्र** गतः?

उत्तरः प्रगतशिक्षणार्थं विनायकः **लण्डनस्थितां रॉयलअॅकॅडमीसंस्थां** गतः।

*४. बेल्लूरमठे करमरकरमहोदयेन **कस्य** पूर्णाकृतिशिल्पं निर्मितम्?

**उत्तर:** बेल्लूरमठे करमरकरमहोदयेन **श्रीरामकृष्णपरमहंस-महोदयस्य** पूर्णाकृतिशिल्पं निर्मितम्।

५. विनायकेन **कुत्र** छत्रपतिशिवरायस्य चित्रं विलेखितम्?

**उत्तर:** विनायकेन **ग्रामस्थराममन्दिरे** छत्रपतिशिवरायस्य चित्रं विलेखितम्।

६. विनायक: लण्डनस्थितां रॉयलअ‍ॅकॅडमीसंस्थां प्रति **केन** प्रेषित:?

**उत्तर:** विनायक: लण्डनस्थितां रॉयलअ‍ॅकॅडमीसंस्थां प्रति **टाटाकम्पनीप्रमुखेण** प्रेषित:।

७. विनायक: **कान्** मिलित्वा स्वदेशं प्रत्यागत:?

**उत्तर:** विनायक: **इटली-फ्रान्स- स्वित्झर्लण्डादिदेशस्थान् शिल्पकारान्** मिलित्वा स्वदेशं प्रत्यागत:।

८. ग्रामस्थराममन्दिरे विनायकेन **कस्य** चित्रं विलेखितम्?

**उत्तर:** ग्रामस्थराममन्दिरे विनायकेन **छत्रपतिशिवरायस्य** चित्रं विलेखितम्।

९. **केन** विनायकस्य परिचय: गुरुवर्यरवीन्द्रनाथटागोरमहोदयेन सार्धं कारित:?

**उत्तर:** **रॉथफिल्डमहोदयेन** विनायकस्य परिचय: गुरुवर्यरवीन्द्रनाथटागोरमहोदयेन सार्धं कारित:।

१०. टाटाकम्पनीप्रमुखेण विनायक: **किमर्थं** लण्डननगरं प्रेषित:?

**उत्तर:** टाटाकम्पनीप्रमुखेण विनायक: **प्रगतशिक्षणार्थम्** लण्डननगरं प्रेषित:।

११. लण्डननगरे प्रावीण्यं संप्राप्य विनायकः **कुत्र** प्रत्यागतः?

**उत्तरः** लण्डननगरे प्रावीण्यं संप्राप्य विनायकः **स्वदेशम्** प्रत्यागतः।

**ब. उचितं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत।**

१. एकदा ग्रामस्थराममन्दिरे _______ छत्रपतिशिवरायस्य चित्रं विलेखितम्। (अयं / अनेन / अस्य)

**उत्तरः** एकदा ग्रामस्थराममन्दिरे **अनेन** छत्रपतिशिवरायस्य चित्रं विलेखितम्।

२. _______ कौशल्येन च विनायकेन प्रथमः क्रमाङ्क प्राप्तः। (स्वप्रतिभया / स्वप्रतिभा / स्वप्रतिभायाः)

**उत्तरः** **स्वप्रतिभया** कौशल्येन च विनायकेन प्रथमः क्रमाङ्क प्राप्तः।

३. रॉथफिल्डमहोदयेन _______ सार्धमस्य परिचयः कारितः। (गुरुवर्यरवीन्द्रनाथटागोरमहोदयस्य / गुरुवर्यरवीन्द्रनाथटागोरमहोदये / गुरुवर्यरवीन्द्रनाथटागोरमहोदयेन)

**उत्तरः** रॉथफिल्डमहोदयेन **गुरुवर्यरवीन्द्रनाथटागोरमहोदयेन** सार्धमस्य परिचयः कारितः।

४. विनायकेन _______ कृते प्रतिमा निर्मिता। (बेल्लूरमठस्य / बेल्लूरमठात्, / बेल्लूरमठः)

**उत्तर:** विनायकेन **बेल्लूरमठस्य** कृते प्रतिमा निर्मिता।

५. टाटाकम्पनीप्रमुखेण सः प्रगतशिक्षणार्थं लण्डनस्थितां ________ प्रति प्रेषितः।

(रॉयलअॅकॅडमीसंस्थया/ रॉयलअॅकॅडमीसंस्थां/ रॉयलअॅकॅडमीसंस्थायाः)

**उत्तर:** टाटाकम्पनीप्रमुखेण सः प्रगतशिक्षणार्थं लण्डनस्थितां **रॉयलअॅकॅडमीसंस्थां** प्रति प्रेषितः।

**क. दत्तं वाक्यं सत्यं वा असत्यम् इति लिखत।**

१. ग्रामस्थराममन्दिरे विनायकेन श्रीरामस्य चित्रं विलेखितम्।

**उत्तर: असत्यम्।**

२. ऑटोरॉथफिल्डमहोदयेन विनायकः मुम्बईस्थिते जे.जे. महाविद्यालयं प्रेषितः।

**उत्तर: सत्यम्।**

३. रॉथफिल्डमहोदयेन विनायकः कोलकत्तानगरं निमन्त्रितः।

**उत्तर: असत्यम्।**

४. रवीन्द्रनाथेन मुम्बईनगरं विनायकः निमन्त्रितः।

**उत्तर: असत्यम्।**

५. विनायकेन बेल्लूरमठस्य कृते श्रीरामकृष्णपरमहंसमहोदयस्य अर्धाकृतिः प्रतिमा निर्मिता।

**उत्तर: असत्यम्।**

६. प्रतिमानिर्माणे रतस्य विनायकस्य कौशल्यं ज्ञात्वा टाटाकम्पनीप्रमुखेण विनायकः लण्डननगरं प्रगतशिक्षणार्थं प्रेषितः।

**उत्तरः सत्यम्।**

## ड. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

१. ________ ऑटोरॉथफिल्डमहोदयेन विनायकः जे.जे. महाविद्यालयं प्रवेशितः।

(सासवणेग्रामे महाविद्यालयः नास्ति इति मत्वा / राममन्दिरे विलेखिंत चित्रं दृष्ट्वा)

**उत्तरः राममन्दिरे विलेखिंत चित्रं दृष्ट्वा** ऑटोरॉथफिल्डमहोदयेन विनायकः जे.जे. महाविद्यालयं प्रवेशितः।

२. रवीन्द्रनाथेन विनायकः कोलकत्तानगरं निमन्त्रितः। यतः____

(गुणी गुणिनं वेत्ति। / सः तत् नगरं द्रष्टुम् ऐच्छत्।)

**उत्तरः** रवीन्द्रनाथेन विनायकः कोलकत्तानगरं निमन्त्रितः। यतः **गुणी गुणिनं वेत्ति।**

३. ________ टाटाकम्पनीप्रमुखेण सः लण्डननगरं प्रेषितः।

(विनायकस्य भाषणं श्रुत्वा / प्रतिमानिर्माणे विनायकस्य कौशल्यं ज्ञात्वा)

**उत्तरः प्रतिमानिर्माणे विनायकस्य कौशल्यं ज्ञात्वा** टाटाकम्पनीप्रमुखेण सः लण्डननगरं प्रेषितः।

## माध्यमभाषया स्वमतप्रकटनम्।

१. ऑटोरॉथफिल्डमहोदयस्य सासवणेग्रामं आगमनेन विनायकस्य जीवने आमूलाग्रं परिवर्तनं जातं वा न वा इति विषये भवतां मतं माध्यमभाषया लिखत।


उत्तर: 'शिल्पकार: करमरकरमहोदय:।' या पाठातून 'विनायक करमरकर' या महान शिल्पकाराचा जीवनवृत्तांत आपल्याला ज्ञात होतो. लहानपणापासून विनायकांस चित्रकला, शिल्पकला यांची अतिशय आवड होती. वेगवेगळ्या प्राण्यांच्या व देवतांच्या मूर्ती ते बनवीत असत. तसेच पुस्तकातील चित्रे पुन्हा रेखाटत असत. त्यांच्या वडिलांनी त्यांना नेहमीच प्रोत्साहन दिले. एकदा त्यांनी गावातील राममंदिरात छत्रपती शिवरायांचे चित्र रेखाटले. त्याच वेळी अलिबाग जिल्हाचे अधिकारी श्री. ऑटोरॉथफिल्ड हे गावाच्या कामकाजाच्या पाहणीसाठी आले होते. विनायकांनी काढलेले चित्र पाहून त्यांचे मन अतिशय प्रसन्न झाले. त्यांनी या मुलाला मिळालेली कलेची दैवी देणगी ओळखली. त्यांनी विनायकास मुंबईतील प्रसिद्ध अशा जे. जे. महाविद्यालयात प्रवेश मिळवून दिला. तेथे आपल्या प्रतिभा व कलाकौशल्याने विनायकाने पहिला क्रमांक पटकाविला.

औपचारिक शिक्षण संपल्यावर श्री. ऑटोरॉथफिल्ड यांनी विनायकांचा गुरुदेव रवींद्रनाथ टागोर यांच्याशी परिचय करून दिला. त्यानंतर तर विनायकांनी मागे वळून पाहिलेच नाही. ते कोलकात्यास गेले. नंतर 'लंडन' येथे गेले. त्यांनी आंतराष्ट्रीय पातळीवर कीर्ती मिळविली. अशाप्रकारे 'सासवणे' गावातील 'ऑटो-रॉथफिल्ड' यांच्याशी त्यांची झालेली भेट ही त्यांच्या आयुष्याला कलाटणी देणारी गोष्ट ठरली. त्यांनी विनायकांतील कलागुण हेरले आणि त्यांच्या आयुष्यास वळण देण्यास साहाय्य केले. 'गुणी गुणिनं वेत्ति।' हे सुवचन येथे समर्पक ठरते.

## पृथक्करणम्।

१. उचितानि पर्यायानि चित्वा वृक्षरेखाचित्रं पूरयत।

**पर्यायाः - लण्डननगरम्, निमन्त्रितः, जे.जे. महाविद्यालयम्, रवीन्द्रनाथटागोरमहोदयेन**



**उत्तर:** **१. जे. जे. महाविद्यालयम्।**

**२. रवीन्द्रनाथटागोरमहोदयेन।**

**३. निमन्त्रितः।**

**४. लण्डननगरम्।**

## क्रमसंयोजनम्।

**१. अधोलिखितानि वाक्यानि क्रमानुसारं पुनर्लिखत।**

i. लण्डनस्थितां रॉयलअॅकॅडमीसंस्थां प्रति गमनम्।

ii. कोलकत्तानगरं निमन्त्रणम्।

iii. स्वदेशं प्रत्यागमनम्।

iv. मुम्बईस्थितं जे.जे. महाविद्यालयं प्रवेशः।

**उत्तर:** i. **मुम्बईस्थितं जे.जे. महाविद्यालयं प्रवेशः।**

ii. **कोलकत्तानगरं निमन्त्रणम्।**

iii. **लण्डनस्थितां रॉयलअॅकॅडमीसंस्थां प्रति गमनम्।**

iv. **स्वदेशं प्रत्यागमनम्।**

**२. घटनाक्रमानुसारं वाक्यानि संयोजयत।**

i. विनायकेन तत्रापि प्रथमः क्रमाङ्कः प्राप्तः।

ii. ऑटोरॉथफिल्डमहोदयेन चित्रं दृष्टम्।

iii. राममन्दिरे विनायकेन छत्रपतिशिवरायस्य चित्रं विलेखितम्।

iv. तेन विनायकः जे.जे. महाविद्यालयं प्रवेशितः।

**उत्तर:** i. **राममन्दिरे विनायकेन छत्रपतिशिवरायस्य चित्रं विलेखितम्।**

ii. **ऑटोरॉथफिल्डमहोदयेन चित्रं दृष्टम्।**

iii. **तेन विनायकः जे.जे. महाविद्यालयं प्रवेशितः।**

iv. **विनायकेन तत्रापि प्रथमः क्रमाङ्कः प्राप्तः।**

**३. अधोनिर्दिष्टा घटना क्रमानुसारं संयोजयत।**

i. इटली-फ्रान्स-स्वित्झर्लण्डादिदेशस्थैः शिल्पकारैः सह मेलनम्।

ii. प्रगतशिक्षणार्थं लण्डनस्थितां रॉयलअॅकॅडमीसंस्थां प्रति गमनम्।

iii. स्वदेशं प्रत्यागमनम्।

iv. बेल्लूरमठस्य कृते श्रीरामकृष्णपरमहंसस्य प्रतिमायाः निर्माणम्।

**उत्तरः** i. **बेल्लूरमठस्य कृते श्रीरामकृष्णपरमहंसस्य प्रतिमायाः निर्माणम्।**

ii. **प्रगतशिक्षणार्थं लण्डनस्थितां रॉयलअॅकॅडमीसंस्थां प्रति गमनम्।**

iii. **इटली-फ्रान्स-स्वित्झर्लण्डादिदेशस्थैः शिल्पकारैः सह मेलनम्।**

iv. **स्वदेशं प्रत्यागमनम्।**

## शब्दज्ञानम्।

### अ. गद्यांशे समानार्थकपदं चिनुत।

| | | | |
|---|---|---|---|
| *१. | मूर्तिः, प्रतिकृतिः, पुत्तलः, पुत्तलिका | = | **प्रतिमा।** |
| *२. | पुरम्, नगरः, खेटकः (गाव) | = | **ग्रामः।** |
| ३. | राघवः | = | **रामः।** |
| ४. | देवालयः | = | **मन्दिरम्।** |
| ५. | चेतः, चित्तम्, मानसम्, हृदयम् .(मन) | = | **मनः।** |
| ६. | नैपुण्यम्, प्रावीण्यम्, पटुत्वम् | = | **कौशल्यम्।** |
| ७. | सह, साकम्, समम् | = | **सार्धम्।** |
| ८. | मग्नः, निमग्नः | = | **रतः।** |

### ब. परिच्छेदे विलोमशब्दं चित्वा लिखत।

| | | | |
|---|---|---|---|
| १. | गतः | × | **आगतः।** |
| २. | अवगुणी, दोषी | × | **गुणी।** |
| ३. | नष्टा | × | **निर्मिता।** |

**क. समूहेतरपदं चित्वा लिखत।**

१. विलेखितम्, निर्मिता, ज्ञात्वा, प्रेषितः

उत्तरः **ज्ञात्वा।**

२. कृत्वा, संप्राप्य, ज्ञात्वा, मिलित्वा

उत्तरः **संप्राप्य।**

३. प्रेषितः,कारितः, प्रवेशितः, मिलित्वा

उत्तरः **मिलित्वा।**

४. निमन्त्रितः, प्राप्तः, कृत्वा, प्रत्यागतः

उत्तरः **कृत्वा।**

५. प्रति, अतः, गुणी, तत्र

उत्तरः **गुणी।**

६. कृत्वा, कृते, एकदा, प्राप्तः

उत्तरः **प्राप्तः।**

७. अतः, आगतः, कारितः, प्रेषितः

उत्तरः **अतः।**

८. रवीन्द्रनाथेन, तेन, विनायकेन, रॉथफिल्डमहोदयेन

उत्तरः **तेन।**

९. तस्मिन्, तेन, अनेन, सः

उत्तरः **अनेन।**

१०. सः, अस्य, तेषाम्, तेन

उत्तरः **अस्य।**

## ड. योग्यं चतुर्थपदं लिखत।

१. ग्रामस्थराममन्दिरेऽनेन : ग्रामस्थराममन्दिरे + अनेन ::
समाप्तेऽध्ययने : ________

**उत्तर:** ग्रामस्थराममन्दिरेऽनेन : ग्रामस्थराममन्दिरे + अनेन ::
समाप्तेऽध्ययने : **समाप्ते + अध्ययने**

२. आ + गम् : आगत: :: प्र + आप् : ________

**उत्तर:** आ + गम् : आगत: :: प्र + आप् : **प्राप्त:**

३. कृ : कृत्वा :: ज्ञा : ________

**उत्तर:** कृ : कृत्वा :: ज्ञा : **ज्ञात्वा**

४. तद् : तेन :: इदम् : ________

**उत्तर:** तद् : तेन :: इदम् : **अनेन**

## इ. धातुसाधित-अव्ययानां चयनम्।

**१. गद्यांशे आगतानि पूर्वकालवाचक-धातुसाधित-अव्ययानि चित्वा लिखत।**

**उत्तर: त्वान्त-अव्ययानि-**

i. ज्ञात्वा। ii. मिलित्वा।

iii. कृत्वा।

**ल्यबन्त-अव्ययम्-**

i. सम्प्राप्य।

फ. सन्धिविग्रहं कुरुत।

| | | | |
|---|---|---|---|
| *१. | रतस्यास्य | = | **रतस्य + अस्य।** |
| २. | समाप्तेऽध्ययने | = | **समाप्ते + अध्ययने।** |
| ३. | कलाकृतीनामध्ययनम् | = | **कलाकृतीनाम् + अध्ययनम्।** |
| ४. | तत्रापि | = | **तत्र + अपि।** |
| ५. | निरीक्षणार्थमागतः | = | **निरीक्षणार्थम् + आगतः।** |

ग. सन्धिं कुरुत।

| | | | |
|---|---|---|---|
| *१. | मन्दिरे + अनेन | = | **मन्दिरेऽनेन।** |
| *२. | अतः + तेन | = | **अतस्तेन।** |
| ३. | सार्धम् + अस्य | = | **सार्धमस्य।** |
| ४. | वेत्ति + इति | = | **वेत्तीति।** |

ह. विशेष्य-विशेषण – अन्वितिः।

१. चतुर्थपदं लिखत।

i. प्रथमक्रमाङ्कः : प्राप्तः :: प्रावीण्यम् : _______

**उत्तरः** प्रथमक्रमाङ्कः : प्राप्तः :: प्रावीण्यम् : **प्राप्तम्**

ii. प्रतिमा : निर्मिता :: पुत्तलः : _______

**उत्तरः** प्रतिमा : निर्मिता :: पुत्तलः : **निर्मितः**

## २. रिक्तस्थानं पूरयत।

i. प्रथम: क्रमाङ्क:।

________ प्रतिमा।

________ पुस्तकम्।

**उत्तर:** प्रथम: क्रमाङ्क:।

**प्रथमा** प्रतिमा।

**प्रथमं** पुस्तकम्।

ii. चित्रं विलेखितम्।

आकृति: ________ ।

पर्वत: ________ ।

**उत्तर:** चित्रं विलेखितम्।

आकृति: **विलेखिता।**

पर्वत: **विलेखित:।**

iii. चित्रं विलेखितम्।

________ विलेखिते।

________ विलेखितानि।

**उत्तर:** चित्रं विलेखितम्।

**चित्रे** विलेखिते।

**चित्राणि** विलेखितानि।

iv. स: निमन्त्रित:।

तौ ________ ।

ते ________ ।

**उत्तर:** स: निमन्त्रित:।

तौ **निमन्त्रितौ**।

ते **निमन्त्रिता:** ।

## अवबोधनम्।

**अ. एकवाक्येन उत्तरं लिखत।**

*१. कोलकत्तानगरे प्रदर्शनार्थं निर्मितस्य शिल्पस्य नाम **किम्**?

**उत्तर:** कोलकत्तानगरे प्रदर्शनार्थं निर्मीतस्य शिल्पस्य नाम **'शङ्खध्वनि:'** इति।

२. विनायकेन निर्मिता **कस्य** मणिशिलामयी प्रतिमा विशेषरूपा?

**उत्तर:** विनायकेन निर्मिता **सन्तज्ञानेश्वरमहाराजस्य** मणिशिलामयी प्रतिमा विशेषरूपा।

३. विनायकेन **किमर्थं** सदैव साहाय्यं कृतम् ?

**उत्तर:** विनायकेन **स्वग्रामोन्नत्यर्थं** सदैव साहाय्यं कृतम् ।

४. करमरकरमहोदय: **केषां** महाश्रय: आसीत्?

**उत्तर:** करमरकरमहोदय: **भूमिगतस्वातन्त्र्यसैनिकानां** महाश्रय: आसीत्।

५. एष: महान् शिल्पकार: **कदा** पञ्चत्वे विलीन:?

**उत्तर:** एष: महान् शिल्पकार: **सप्तषट्नवैकतमे (१९६७) ख्रिस्ताब्दे** पञ्चत्वे विलीन:।

६. सैनिकशालाया: कृते छत्रपतिशिवाजीमहाराजस्य प्रतिमानिर्माणकार्ये विनायक: **केन** नियुक्त:?

**उत्तर:** सैनिकशालाया: कृते छत्रपतिशिवाजीमहाराजस्य प्रतिमानिर्माणकार्ये विनायक: **राजर्षि-शाहूमहाराजमहोदयेन** नियुक्त:।

७. पुणेनगरस्थ: शिवाजीमहाराजस्य पुत्तल: **कति** फूटपरिमितोन्नत:?

**उत्तर:** पुणेनगरस्थ: शिवाजीमहाराजस्य पुत्तल: **सार्धत्रयोदश** फूटपरिमितोन्नत:।

८. पुणेनगरस्थ: शिवाजीमहाराजस्य पुत्तल:**कति** टनभार:?

**उत्तर:** पुणेनगरस्थ: शिवाजीमहाराजस्य पुत्तल: **अष्टटनभार:**।

९. विनायकेन प्रेक्षकाणां पुरत: **कस्य** प्रतिमानिर्माणं कृतम्?

**उत्तर:** विनायकेन प्रेक्षकाणां पुरत: **कुलगुरु-दलानमहोदयस्य** प्रतिमानिर्माणं कृतम्।

१०. **केषां** कृते विनायक: शरण्य:?

**उत्तर: अकिञ्चनच्छात्राणाम्** कृते विनायक: शरण्य:।

**ब. योग्यं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत।**

१. छत्रपतिशिवाजीमहाराजस्य प्रतिमानिर्माणकार्ये नियुक्त: ________। (अमुम् / असौ / अमी)

**उत्तर:** छत्रपतिशिवाजीमहाराजस्य प्रतिमानिर्माणकार्ये नियुक्त: **असौ।**

२. ________ पुत्तल: सर्वेषां नेत्रसुखविषय:विराजते। (एष: / एतद् / ते)

**उत्तर: एष:** पुत्तल: सर्वेषां नेत्रसुखविषय:विराजते।

३. विदेशेऽपि स ________। (गौरवितौ / गौरविते / गौरवित:)

**उत्तर:** विदेशेऽपि स **गौरवित:।**

**क. सत्यं वा असत्यं तद् लिखत।**

१. विनायकेन मुम्बईनगरे शङ्खध्वनि: इति विशेषप्रतिमा निर्मिता।

**उत्तर: असत्यम्।**

२. फलटणनगरस्था सन्तज्ञानेश्वरमहाराजस्य प्रतिमा विशेषरूपा।

**उत्तर: सत्यम्।**

३. लण्डनस्थितविद्यापीठेन विशेषरूपेण अयं निमन्त्रित:।

**उत्तर: असत्यम्।**

४. करमरकरमहोदय: दयासागर: स्वराष्ट्रानुरागी च।

**उत्तर: सत्यम्।**

**ड. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।**

१. विनायकः स्वराष्ट्रानुरागी यतः ________

(भूमिगतस्वातन्त्र्यसैनिकानां सः महाश्रयः आसीत्। /

तेन नैकाः प्रतिमाः निर्मिताः।)

**उत्तर:** विनायकः स्वराष्ट्रानुरागी यतः **भूमिगतस्वातन्त्र्यसैनिकानां सः महाश्रयः आसीत्।**

**माध्यमभाषया स्वमतप्रकटनम्।**


१. 'करमरकरमहोदयः दयासागरः राष्ट्रानुरागी च' इति विषये भवतां मतं माध्यमभाषया लिखत।

**उत्तर:** 'शिल्पकारः करमरकरमहोदयः।' या पाठात आपल्याला जगद्विख्यात शिल्पकार श्री. करमरकर यांचे जीवनचरित्र पाहावयास मिळते. लहानपणापासून विनायकांना विविध कलांची आवड होती. त्यांच्या वडिलांनी त्यांना नेहमीच प्रोत्साहन दिले. एकदा त्यांनी एका मंदिरात काढलेले सुंदर चित्र पाहून तेथे आलेले जिल्हाधिकारी अतिशय प्रभावित झाले. त्यांनी विनायकांना मुंबईतील 'जे. जे स्कूल ऑफ आर्टस्' या प्रसिद्ध कलामहाविद्यालयात, प्रवेश मिळवून दिला. पुढील शिक्षणासाठी ते 'लंडन' येथे गेले. तेथील कायमच्या वास्तव्याची संधी नाकारून स्वदेशप्रेमापोटी ते भारतात परतले. त्यांनी रामकृष्ण परमहंस, रवींद्रनाथ टागोर, गांधीजी, छत्रपती शिवाजी, संत ज्ञानेश्वर, न्यायमूर्ती दिनशा मुल्ला, शेरपा तेनसिंग, लोकमान्य टिळक, गोपाळ गणेश आगरकर, विष्णूशास्त्री चिपळूणकर, कावसजी जहांगीर इत्यादी अनेक थोरामोठांच्या मूर्ती घडविल्या. यातील अनेकजण स्वातंत्र्य-सेनानी होते. तसेच विनायकांनी स्वातंत्र्यलढ्यात अनेक भूमिगत स्वातंत्र्यसैनिकांना साहाय्य केले. यावरून त्यांची देशभक्ती दिसून येते.

आपल्याला जीवनात प्रगती साधण्यासाठी इतरांच्या झालेल्या साहाय्याचे स्मरण ठेवून विनायकांनीही अनेक गरीब, होतकरू विद्यार्थ्यांना शिक्षणासाठी मदत केली. प्रगतीचे उच्चशिखर गाठूनही ते त्यांच्या जन्मगावास न विसरता तेथे परत आले आणि तेथेही त्यांनी आपल्या खेड्यासाठी अनेक सुविधा पुरविल्या. आपल्या खेड्याच्या उद्धारासाठी ते झटले. यावरून करमरकर केवळ महान शिल्पकारच नव्हे तर एक कनवाळू व्यक्ती व देशभक्तही होते हे समजते.

## पृथक्करणम्।

१. अधोनिर्दिष्टं जालरेखाचित्रं गद्यांशस्य साहाय्येन पूरयत।





उत्तर: १. **शङ्खध्वनिः।**

२. **छत्रपतिशिवाजीमहाराजस्य।**

३. **सन्तज्ञानेश्वरस्य।**

४. **कुलगुरु-दलानमहोदयस्य।**

२. करमरकरमहोदयस्य कृते उपयोजितानि विशेषणानि गद्यांशे चित्वा जालरेखाचित्रं पूरयत।




उत्तर: १. **दयासागरः।** २. **स्वराष्ट्रानुरागी।**

३. **शरण्यः।** ४. **महाश्रयः।**

## क्रमसंयोजनम्।

**घटनाक्रमानुसारं वाक्यानि पुनर्लिखत।**

i. पुणेनगरस्थसैनिकशालायाःकृते छत्रपतिशिवाजीमहाराजस्य प्रतिमानिर्माणम्।

ii. सप्तषट्नवैकतमे ख्रिस्ताब्दे पञ्चत्वे विलीनः।

iii. व्हिसकॉन्सिन-विद्यापीठेन निमन्त्रितः।

iv. कोलकत्तानगरे शङ्खध्वनिः इति प्रतिमा निर्मिता।

उत्तर: **i. कोलकत्तानगरे शङ्खध्वनिः इति प्रतिमा निर्मिता।**

**ii. पुणेनगरस्थसैनिकशालायाः कृते छत्रपतिशिवाजीमहाराजस्य प्रतिमानिर्माणम्।**

**iii. व्हिसकॉन्सिन-विद्यापीठेन निमन्त्रितः।**

**iv. सप्तषट्नवैकतमे ख्रिस्ताब्दे पञ्चत्वे विलीनः।**

## शब्दज्ञानम्।

### अ. पर्यायशब्दानां चयनम्।

| | | | |
|---|---|---|---|
| *१. | मूर्तिः, प्रतिकृतिः | = | **प्रतिमा, पुत्तलः।** |
| *२. | निर्धनः, अधनः, दरिद्रः (गरीब) | = | **अकिञ्चनः।** |
| ३. | शोभते, राजते, विलसति (शोभून दिसते) | = | **विराजते।** |
| ४. | अग्रे, पुरस्तात् | = | **पुरतः।** |
| ५. | दयानिधिः, करुणानिधिः | = | **दयासागरः।** |
| ६. | विकासः, प्रगतिः | = | **उन्नतिः।** |

### ब. विलोमपदांना चयनम्।

| | | | |
|---|---|---|---|
| १. | अपकीर्तिः | × | **कीर्तिः।** |
| २. | पृष्ठतः | × | **पुरतः।** (समोर) |
| ३. | राष्ट्रद्रोही | × | **राष्ट्रानुरागी।** (स्वदेशप्रमी) |
| ४. | अवनतिः | × | **उन्नतिः।** (प्रगती) |
| ५. | धनिकः, धनवान् | × | **अकिञ्चनः।** (गरीब) |
| ६. | अल्पजीवी | × | **चिरजीवी।** (अमर) |

### कः समूहेतरपदं चिनुत।

१. गौरवितः, सञ्ज्ञातः, विराजते, निमन्त्रितः

**उत्तर: विराजते।**

२. कृते, पुनश्च, पुरतः, बहवः

उत्तरः **बहवः।**

३. विशेषरूपा, कृतम्, निर्मिता, नियुक्तः

उत्तरः **विशेषरूपा।**

४. महाश्रयः, नेत्रसुखविषयः, दयासागरः, स्वराष्ट्रानुरागी

उत्तरः **नेत्रसुखविषयः।**

**ड. योग्यं चतुर्थपदं लिखत।**

१. प्रतिमा : निर्मिता :: प्रतिमाः : _______

उत्तरः प्रतिमा : निर्मिता :: प्रतिमाः : **निर्मिताः**

२. कृ : कृत्वा :: नी : _______

उत्तरः कृ : कृत्वा :: नी : **नीत्वा**

३. पुत्तलः : विराजते :: शिल्पानि : _______

उत्तरः पुत्तलः : विराजते :: शिल्पानि : **विराजन्ते**

**इ. धातुसाधित-अव्ययानां चयनम्।**

१. **गद्यांशे आगते पूर्वकालवाचक-धातुसाधित-त्वान्त-अव्यये चित्वा लिखत।**

उत्तरः i. कृत्वा। ii. नीत्वा।

**फ. सन्धिविग्रहं कुरुत।**

१. विराजमानेनानेन = **विराजमानेन + अनेन।**

२. अधुनापि = **अधुना + अपि।**

३. विशेषरूपेणायम् = **विशेषरूपेण + अयम्।**

४. विदेशेऽपि = **विदेशे + अपि।**

**ग. सन्धिं कुरुत।**

*१. नियुक्तः + असौ = **नियुक्तोऽसौ।**

*२. पुनः + च = **पुनश्च।**

३. तत्र + अपि = **तत्रापि।**

४. सदा + एव = **सदैव।**

**ह. विशेष्य-विशेषण – अन्वितिः।**

१. **चतुर्थपदं लिखत।**

प्रतिमा : निर्मिता :: पुत्तलः : _______

उत्तरः प्रतिमा : निर्मिता :: पुत्तलः : **निर्मितः**

## सूचनानुसारं वाक्यपरिवर्तनं कुरुत।

*१. समाप्तेऽध्ययने रॉथफिल्डमहोदयेन टागोरमहोदयेन सार्धं परिचयः कारितः। (सति-सप्तमीरचनां निष्कासयत।)

**उत्तर:** **यदा अध्ययनं समाप्तं तदा** रॉथफिल्डमहोदयेन टागोरमहोदयेन सार्धं परिचयः कारितः।

**स्पष्टीकरण** – गौण वाक्यांश ओळखा.
त्या वाक्यांशाच्या आधी 'यदा' व नंतर 'तदा' योजा.
गौण वाक्यातील सप्तमी विभक्तीतील शब्द प्रथमेत योजा.
शब्दांची फेरमांडणी करा.

७ ७
( **समाप्ते** **अध्ययने** ) रॉथफिल्डमहोदयेन टागोरमहोदयेन सार्धं परिचयः कारितः।
↓ ↓ ↓ ↓
**यदा** **समाप्तम्** **अध्ययनं** **तदा** रॉथफिल्डमहोदयेन टागोरमहोदयेन सार्धं परिचयः कारितः।
१ १

*२. दृष्टमात्रे तस्मिन् चित्रे तस्य मनः प्रहृष्टमेव। (सति-सप्तमीरचनां निष्कासयत।)

**उत्तर:** **यदा दृष्टमात्रं तद् चित्रं तदा तस्य मनः प्रहृष्टमेव।**

**स्पष्टीकरण** – गौण वाक्यांश ओळखा.
त्या वाक्यांशाच्या आधी 'यदा' व नंतर 'तदा' योजा.
गौण वाक्यातील सप्तमी विभक्तीतील शब्द प्रथमेत योजा.

७ ७ ७
( **दृष्टमात्रे** **तस्मिन्** **चित्रे** ) तस्य मनः प्रहृष्टमेव।
↓ ↓ ↓ ↓ ↓
**यदा** **दृष्टमात्रं** **तद्** **चित्रं** **तदा** तस्य मनः प्रहृष्टमेव।
१ १ १

*३. राममन्दिरेऽनेन छत्रपतिशिवरायस्य चित्रं विलेखितम्। (प्रयोगपरिवर्तनं कुरुत।)

**उत्तर: राममन्दिरे अयं छत्रपतिशिवरायस्य चित्रं विलेखितवान्।**

**स्पष्टीकरण** – कर्ता (३) कर्म (१) कर्मणि-भू-धा-वि (१) = कर्मणि-प्रयोगः

राममन्दिरे अनेन छत्रपतिशिवरायस्य चित्रं विलेखितम्।

↓

राममन्दिरे अयं छत्रपतिशिवरायस्य चित्रं विलेखितवान्।

कर्ता (१) कर्म (२) कर्तरि-भू-धा-वि (१) = कर्तरि-प्रयोगः

*४. तत्र नयनरम्यः शिल्पालयः वर्तते। (बहुवचने लिखत।)

**उत्तर:** तत्र **नयनरम्याः शिल्पालयाः वर्तन्ते।**

**स्पष्टीकरण–** विशेषणम्

तत्र **नयनरम्यः शिल्पालयः वर्तते।**

↓

तत्र **नयनरम्याः शिल्पालयाः वर्तन्ते।**

कर्ता क्रियापदम्

*५. अध्ययनं कृत्वा सः स्वदेशं प्रत्यागतः। ('प्रत्यागतः' इति पदस्य स्थाने प्रथमभूतकालस्य योग्यं रूपं योजयत।)

**उत्तर:** अध्ययनं कृत्वा सः स्वदेशं **प्रत्यागच्छत्।**

**स्पष्टीकरण–** प्रत्यागतः = **प्रति + आ + गम् → गच्छ्** (१ परस्मैपद)

कर्तरि भूतकालवाचक धातुसाधित विशेषण,

पुंलिंगी प्रथमा एकवचन.

∴ सः कर्ता आहे म्हणून तृतीय पुरुषी एकवचनी आहे.

∴ भूतकाळ प्रति + आ + गम् → गच्छ्

तृतीय पुरुषी एकवचन

= **प्रत्यागच्छत्।**

**टीप** – प्र + गम् → गच्छ् (१ परस्मैपद) हा येथे अकर्मक धातू मानला आहे. अनेक ठिकाणी गम् (गच्छ् १ परस्मैपद) सकर्मक धातू म्हणून मानला जातो. संदर्भानुसार विद्यार्थ्यांनी या धातूस सकर्मक अथवा अकर्मक समजावे.

६. विनायकः बाल्ये एव मृत्प्रतिमाः निर्मातुं प्रारभत। (प्रयोगपरिवर्तनं कुरुत।)

**उत्तर: विनायकेन बाल्ये एव मृत्प्रतिमाः निर्मातुं प्रारभ्यत।**

**स्पष्टीकरण** – या वाक्यात, मृत्प्रतिमाः निर् + मा (निर्मातुं) चे कर्म आहे. 'प्रारभत' चे नव्हे.

'प्रारभत' साठी कोणतेही 'कर्म' नाही कारण तो धातू अकर्मक आहे.

म्हणून याचा भावे प्रयोग होतो.

∴ **प्रारभ्यत** तृतीय पुरुषी एकवचन रूप.

७. तस्य पित्रा समुचितसंस्कारैः सः समारोपितः। (प्रयोगपरिवर्तनं कुरुत।)

**उत्तरः तस्य पिता समुचितसंस्कारैः तं समारोपितवान्।**

**स्पष्टीकरण –**

| कर्ता | | | कर्म | कर्मणि-भू-धा-वि | = | कर्मणि-प्रयोगः |
| --- | --- | --- | --- | --- | --- | --- |
| | ३ | | १ | १ | | |
| तस्य | पित्रा | समुचितसंस्कारैः | सः | समारोपितः। | | |
| तस्य | पिता | समुचितसंस्कारैः | तं | समारोपितवान्। | | |
| | १ | | २ | १ | | |
| कर्ता | | | कर्म | कर्तरि-भू-धा-वि | = | कर्तरि-प्रयोगः |

८. विनायकेन प्रथमः क्रमाङ्कः प्राप्तः। (प्रयोगपरिवर्तनं कुरुत।)

**उत्तरः विनायकः प्रथमं क्रमाङ्कं प्राप्तवान्।**

**स्पष्टीकरण –**

| कर्ता | (विशेषणम् | कर्म) | कर्मणि-भू-धा-वि | = | कर्मणि-प्रयोगः |
| --- | --- | --- | --- | --- | --- |
| ३ | १ | १ | १ | | |
| विनायकेन | प्रथमः | क्रमाङ्कः | प्राप्तः। | | |
| विनायकः | प्रथमं | क्रमाङ्कं | प्राप्तवान्। | | |
| १ | २ | २ | १ | | |
| कर्ता | (विशेषणम् | कर्म) | कर्तरि-भू-धा-वि | = | कर्तरि-प्रयोगः |

९. तत्र प्रावीण्यं सम्प्राप्य स स्वदेशं प्रत्यागतः। (पूर्वकालवाचकं निष्कासयत।)

**उत्तर:** तत्र प्रावीण्यं **सम्प्राप्तवान्** स स्वदेशं प्रत्यागतः **च।** किंवा

**उत्तर:** तत्र प्रावीण्यं **सम्प्राप्नोत्** स स्वदेशं प्रत्यागतः **च**।

**स्पष्टीकरण –** वाक्यातील पूर्वकालवाचक अव्यय ओळखा – सम्प्राप्य.
मुख्य धातू – सम् + प्र + अप् (५ परस्मैपद) आहे.
'सः' कर्ता आहे तो तृतीय पुरुष एकवचन पुंलिंगी आहे.
वाक्यातील मुख्य क्रियापद 'प्रत्यागतः' आहे.

∴ १. सम् + प्र + आप् (५ परस्मैपद) चे कर्तरि भूतकालवाचक धातुसाधित विशेषण सम्प्राप्तवान्
= कारण कर्ता पुंलिंगी एकवचन आहे.

२. सम् + प्र + आप् (५ परस्मैपद) चा प्रथम भूतकाळ
= सम्प्राप्नोत् (कर्ता तृतीय पुरुष एकवचन असल्यामुळे)
दुसऱ्या क्रियापदानंतर **'च'** घालण्यास विसरू नका.

१०. रवीन्द्रनाथेन कोलकत्तानगरं स निमन्त्रितः। (प्रयोगं परिवर्तयत।)

**उत्तर: रवीन्द्रनाथः कोलकत्तानगरं तं निमन्त्रितवान्।**

**स्पष्टीकरण –**

| कर्ता | | कर्म | कर्मणि-भू-धा -वि | = | कर्मणि – प्रयोगः |
|---|---|---|---|---|---|
| ३ | | १ | १ | | |
| रवीन्द्रनाथेन | कोलकत्तानगरं | सः | निमन्त्रितः। | | |
| ↓ | | ↓ | ↓ | | |
| रवीन्द्रनाथः | कोलकत्तानगर | तं | निमन्त्रितवान्। | | |
| १ | | २ | १ | | |
| कर्ता | | कर्म | कर्तरि-भू-धा-वि | = | कर्तरि-प्रयोगः |

११. विनायकेन श्रीरामकृष्णपरमहंसमहोदयस्य पूर्णाकृतिः प्रतिमा निर्मिता। (प्रयोगपरिवर्तनं कुरुत।)

**उत्तरः विनायकः श्रीरामकृष्णपरमहंसमहोदयस्य पूर्णाकृतिं प्रतिमां निर्मितवान्।**

कर्ता (विशेषणम् कर्म) कर्मणि-भू-धा-वि

३ १ १ १

विनायकेन श्रीरामकृष्णपरमहंसमहोदयस्य पूर्णाकृतिः प्रतिमा निर्मिता।

विनायकः श्रीरामकृष्णपरमहंसमहोदयस्य पूर्णाकृतिं प्रतिमां निर्मितवान्।

१ २ २ १

कर्ता (विशेषणम् कर्म) कर्तरि-भू-धा-वि

१२. राजर्षिशाहूमहाराजमहोदयेन छत्रपतिशिवाजीमहाराजस्य अश्वारूढप्रतिमानिर्माणकार्ये नियुक्तः असौ। (प्रयोगपरिवर्तनं कुरुत।)

**उत्तरः राजर्षिशाहूमहाराजमहोदयः छत्रपतिशिवाजीमहाराजस्य अश्वारूढप्रतिमानिर्माणकार्ये नियुक्तवान् अमुम्।**

**स्पष्टीकरण** – कर्ता कर्मणि-भू-धा-वि कर्म

३ १ १

राजर्षिशाहूमहाराजमहोदयेन छत्रपतिशिवाजीमहाराजस्य अश्वारूढप्रतिमानिर्माणकार्ये नियुक्तः असौ।

राजर्षिशाहूमहाराजमहोदयः छत्रपतिशिवाजीमहाराजस्य अश्वारूढप्रतिमानिर्माणकार्ये नियुक्तवान् अमुम्।

१ १ २

कर्ता कर्तरि-भू-धा-वि कर्म